National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(63): 302-304
© 2025 NJHSR
www.sanskritarticle.com

**वादिराजः के.**
शोधछात्रः, द्वैतवेदान्त विभागः ,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**वादिराजः के.**
शोधछात्रः, द्वैतवेदान्त विभागः ,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# प्रलयः

## कल्प प्रलयः सत्यलोकं विहाय अन्यत् सर्वे लोकाः जले विलीयन्ते । श्रीः

**वादिराजः के .**

प्रलयो नाम किम् ?

**अव्यक्तात् व्यक्तयः सर्वाः प्रभवन्त्य अहरागमे ।**
**रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्त संज्ञके ॥ १८॥**

(अ. ८. भगवत् गीता)

**परब्रह्मणः अहरारम्भे –** परमात्माधीन मूलप्रकृतिः अव्यक्तो वर्तते , ब्रह्माण्डे दृश्यमानपदार्थान् , ब्रह्माण्डं च मूल अव्यक्तप्रकृतेः विकारात् प्रकटी करिष्यति . एवं मूलप्रकृत्या परिणिते सति नूतनप्रपंचाकारेण रूपान्तरमेव सृष्टिः। पुनः परब्रह्मण रात्र्यारम्भे समस्तमिदं विश्ववं तदन्तर्गत समग्रपदार्थाश्च अव्यक्तप्रकृतितत्त्वे विलीयन्ते । अयमेव प्रलयः ।

**भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।**
**रात्र्यागमेवशः पार्थ प्रभवत्यहरागमे ॥१९॥**

(अ.८.भगवत् गीता)

प्रपंचस्य सर्वे पदार्थाः प्रपंचस्य च ईश्वराधीनः भगवतः अहराम्भे उत्पद्यन्ते , पुनः रात्र्यारम्भे प्रलीयन्ते . अव्यक्तपरमात्म एव व्यक्तचराचर प्रपंचात् अत्यन्त विलक्षणः । समस्त चराचरपदार्थाः , सृष्टिः लयश्च यान्त्यपि , अयं अविनाशी . अनादिः , स्वतन्त्रः , सर्वोत्तमश्च।

परमात्मा प्रकृतिं उपादानी कृत्य स्वयं ब्रह्माण्डं असृजत् , तेषां साधनार्थं स्थूलदेहं दत्वा जीवात्मानं ससर्ज ।

ईश्वरः ब्रह्मादिदेवन् सृज्य , सत्यादिलोकान् अदात् , समग्र तत्त्वाभिमानिदेवेभ्यः समस्तं विश्वं नियम्य पालयति।

एवं ब्रह्ममानात् ब्रह्मणः वर्षशतं “ परः “ कालः व्यतीतः । द्वितियपरार्धस्य अन्त्ये सृज्याः सर्वेऽपि पुनः विशिष्ट क्रमेण लयं यान्ति । जीवेभ्यः कृत साधनैः तेषां गतिं दापयति ।

सर्वे जीवाः तेषां स्वरूपोपरि अनादिकालावृतः प्राकृतिक लिंगदेहो वर्तते । साधन साध्यानां प्रलये लिंगदेहभंगो भवति । स्वरूपदेह , स्वरूपानन्द आविर्भावो भवति ।

ईश्वरः तस्य अपार महिम्ना जगदसृजत् , अनिरुद्धरूपेण जगति जीवानां स्थिति, पालनं व्यधायि । धर्मस्थापनं च अकरोत् । तदर्थं अनेके अवताराः स्वीचकार । यदा जीवानां साधनं समाप्तं तथा ब्रह्मणः ब्रह्ममानात् वर्षशतं आयुः (पर काल) समाप्ते सति संकर्षण रूपेण लयकर्तुं इयाय ।

**प्रलयस्य विधाः -**

ब्रह्मणः वर्षशतान्तिमे जायमान प्रलयः “ महाप्रलयः “ तत्पुर्वं मध्ये “ अवान्तर प्रलयाः “ सम्भवन्ति ।

**१ युगाणां अन्त्ये यो प्रलयो –** युगान्त प्रलयः एतस्मिन् प्रलये विशेषेण प्राणिक्षयो भवति । एतत् एको अवान्तर प्रलयः ।

**२ प्रति मन्वन्तर समास्यनन्तरमपि प्रलयो भवति** , तत् " मनु प्रलयः "अत्रापि प्राणिक्षयो भवति, तथा भूमिः , अन्तरिक्षः, स्वर्गः एते लोकाः जलराशौ विलीयन्ते ।

**३ ब्रह्मणः** प्रत्यहं समास्यनन्तरं रात्रौ प्रलयो भवति । एतत् दिन प्रलयः अथवा एते अवान्तर प्रलयाः ।

**४ ब्रह्मणः** अयुर्रान्ते जायमान महाप्रलयः तत् वर्षशतकालपर्यन्तं भवति , एतत् परमात्मनः रात्रिः अयं तस्य योगनिद्रा कालः ।

महाप्रलयकाले ब्रह्माण्डान्तः सकल पदार्थाः विनश्यन्ति। ते सर्वे ब्रह्माण्डस्य बर्हि जलावरणे लीयन्ते , ब्रह्माण्डबहिः नव आवरणानि अधस्तात् लोकात् उपरिलोकपर्यन्तं एकः एकस्मिन् लीनो भवति । सर्वे लोकाः महत् तत्त्वे लयो भूत्वा मूलवस्तु अव्यक्ततत्त्व प्रकृत्यां लीयन्ते . अयमेव महाप्रलयः ।

**महाप्रलयस्य विवरः –**

ब्रह्मणः द्वितीय परार्धः , ब्रह्मणः सार्धसप्ताशीति वर्षः(८७.१\२) समाप्स्यति । सार्धद्वादशवर्ष आयुः भविष्यति । अतः लय आरिप्सु । परमात्मा संकर्षण रूपात् मन्युं प्रदर्श्य , प्रलयकालस्य नृत्यं प्रकटीचकार ।

प्रलयकालस्य चंडमरुत् , कालाग्निः , तथा धाराकार वर्षः प्रारब्धः, मनुष्यमानात् एकवर्षशतकालः अनावृष्ट्या प्राणिक्षयो अभवत् ।

अनन्तरं सूर्यस्य प्रखर किरणैः लोकान् शुष्कं अकारि । संकर्षणरूपि परमात्मा शेषमुखात् प्रलयाग्निं प्रावर्षत् । अयं " संवर्त" अग्निः इति प्रसिद्धः । पाताललोकात् आरभ्य समस्त लोकान् भस्मि करोति , अनन्तरं एकवर्षकालपर्यन्तं प्रखरवायुः प्रवहति, तदनन्तरं प्रलय-कालस्य हस्तिदन्तगात्रं वर्ष बिन्दुः प्रवहति ।

संवर्तक नाम प्रलयकालमेघाः समस्त अवशेषान् जले निमज्य , सर्वं जलावृतं करोति । एवं चतुशतवर्षेषु ब्रह्माण्डान्ते सर्वं विनश्य , सकल लोकाः जलावृत्तो भवति । एतत् ब्रह्माण्डान्तः प्रलयः . एवं ब्रह्माण्डबहिः तत्त्वावरणानां लयः , सृष्टौ तत्त्वानि यत् क्रमे व्यक्तं , तस्य विलोमः नाम (विरुद्धः) क्रमेण लयो भवति ।

पृथिवीतत्त्वं जले लयो भवति , जलं तेजसि , तेजः वायौ , वायुः आकाशतत्त्वे, लीयते , एवं पंचमहाभूतानि आकाशे संमिलितानि । एतानि पंचमहाभूतानि तेषां सूक्ष्मरूपाणि रूपः , रसः , गन्धःस्पर्ष , शब्दः एते पंच तम्मात्रेषु संयुज्यन्ते । एते (तन्मात्राणि) दशेन्द्रियेषु , ते(दशेन्द्रियाणि) मनस्तत्तत्वे , ते अहंकारतत्तत्वे लीयन्ते , अहंकारतत्त्वं महत् तत्त्वे लयो भवति ।

महतत्त्वस्तु – सत्वं , रजः , तमः इति गुणत्रयमिश्रणम् . दशभागः सत्त्वम् , एकं तमः , एकं राजसतामसे , एकं राजस , राजस एवं १३ अंशनां मिश्रणं एतत् विषमावस्था , एतत् सृष्टिकारणम् . एतान् विहाय मिश्रावस्थां त्यज्य मूलप्रकृतौ साम्यावस्थां नाम क्रियाविना लयो भवति । इदं अव्यक्ततत्त्वं इति कथ्यते। एते सर्वे महालक्ष्म्याधीनं, सा तु ईश्वताधीना , (वक्षस्थल निवसिनी) ।

अस्मिन् महाप्रलये जीवाः , देवताशच् लयो यान्ति । एते तेषां उत्तमानां लयो भवति । अन्तिमे परमात्मनः उदरं प्रविषन्ति ।

मुक्तियोग्याः जीवाः मर्गद्वयेण परमात्मानं प्राप्नुवन्ति

**१ शेषमार्गः –** मनुष्यगन्धर्वाः , देवगन्धर्वाः , अजानज देवताः कुबेरे लयं यान्ति , कुबेरः वरुणे , वरुणः चन्द्रे , चन्द्रः , जयः ,विजयादयः अनिरुद्धे अयं कामे लयो याति । कामः ,रतिः, वारुणी शेषे , शेषः सरस्वत्यां , सरस्वती ब्रह्मणि, समस्त जीवयुक्तः ब्रह्म लक्ष्म्यां , लक्ष्मै लयो नास्ति , नित्यमुक्ता सा , परमात्मनः नित्यावियोगिनी , परमात्मनः अत्यन्तसामिप्यमेव तस्याः लयः इति ।

**२ गरुडमार्गः –** मनुष्योत्तमाः , निर्ऋतिः , पितृदेवताः एते यमे प्रविशन्ति । यमः स्वायम्भुवमनौ, मनुः अग्न्यादयः सूर्ये , सूर्यः गणपत्यादयः बृहस्पतौ , तथा बृहस्पतिः , मनुः , दक्षः शचीदेवी इन्द्रे प्रवेशः। इन्द्रः सौपर्ण्यां, सौपर्णी गरुडे, गरुडः शेषे, शेषः सरस्वतीद्वार ब्रह्मणि प्रवेशः । तदनन्तरं समेषां युक्तः ब्रह्म लक्ष्मीद्वारा परमात्मनः उदरं प्रविशति ।

एवं जड इव जीविनः अपि महाप्रलयकाले लयो सम्भवति ।

अनेन ईश्वरः जीवान् सृज्य स्थूलदेहिनं कृत्वा योग्यतानुसारेण (तेषां) कर्माणि कारयित्वा साधनं कारयिष्यति । एतत्सर्वं अवसिते सति तेषां योग्य गतिं दापयितुं प्रलयं करोति । अविकारी स समेषां समत्वात् " समवर्ति " इति खातिः ।

समग्रम् विश्वं भगवतः भोजन प्रक्रिया इति उपनिषदादौ प्रस्तूयते –

**यस्य ब्रह्म च क्षत्रं च उभे भवत ओदनः ।**
**मृत्युर्यस्य उपसेचनं क इत्थावेद यत्र सः ॥**

(काटकोपनिषत् १-२-२५)

**परमात्मनः भूरि भोजनम् -**

भगवान् विष्णवे भूरि भोजनाय समग्रं विश्ववं चराचर पदार्थानि खाद्यपदर्थानि । क्षीरं ,दधि , इक्षुः ,घृतं, मधु ,इत्यादि षड् सागराः रसपदार्थाः । समग्रं विश्वं सुवर्णमय पात्रं, महालक्ष्मी पाची। ब्राह्मण, क्षत्रियादयः अन्नं, मृत्युदेवः घृतं, एवं एकेके एकेक पदार्थाः।

महालक्ष्मिः सुवर्णमयपात्रे दुर्गारूपेण प्रलयाग्नौ भक्ष्य , भोज्यान् निर्माति ।

परमात्मस्तु विश्वव्याप्तः , अयं बृहत् मुखे सर्वं पिण्डं कृत्वा खादति , तदा प्रियसुतः वायुः पित्रे स्वेदापनाय चामर सेवां करोति ।

एवं ब्रह्माण्डप्रलयरूप रसवत्तरं भोजनं समाप्य ईश्वरः शुद्ध-जलसागरस्य जलं अपिबत् आचमनं च चकार । भुक्त पदार्थानां जीर्णि कर्तुं ब्रह्माण्डस्य सुवर्ण खर्परं प्रलयाग्नौ दग्ध्वा सुवर्णभस्म ताम्बूल इव स्वीचकार महाप्रभुः ।

एवं भूरिभोजनं समाप्य परमात्म लक्ष्म्या सह रेमे ।

अत्र समस्तजीवाः ब्रह्मणा सह ईशोदरं प्रवेशनीयं , तादृशि जीवेषु कृतसाधनजीवाः , अकृतसाधनजीवाः , सन्ति । मुक्तियोग्याः , तमो योग्याः सन्ति । ब्रह्मादि मुक्तियोग्यानां कृते विरजा स्नां भवितव्यं , स्नानेन अनादिकालिनः लिंगदेहभम्गो भवति । विरजा नाम लक्ष्म्याः अन्यत् रूपमेव। विगतः रजः त्रिगुणनां सम्बन्धाभावः वैकुंटस्य परितः प्रसार्यमाणा नदी । तत्र ब्रह्मणा सह स्नानं क्रियमाणे सति लिंगदेहभंगो भवति । नाम जीवानां त्रिगुणात्मिक सम्बन्धः नैव भवति। ते मुक्तो भविष्यन्ति ।

ब्रह्म तु मुक्तियोग्यान् तेन साकं विरजायां स्नानं करोति। अनन्तरं लिंगदेहं विनश्य परमात्मनः उदरं प्रविशन्ति ।

समस्त जीवान् तस्योदरे संस्थाप्य ईश्वरः लक्ष्म्या साकं रेमे । योगनिद्रां करोति । ब्रह्ममानस्य एकशतवर्षकालः प्रलयकालः । तत् परमात्मनः रात्रिः । सार्धसप्ताशीतिवर्षकालः ईश्वरस्य योगनिद्रा । तदा सृष्ट्यादि क्रिया नास्तेव । पुनः सार्धद्वादशवर्षे विद्यमाने सति, अम्भ्रणीरूप लक्ष्मीदेविः श्रुतिगीतायाः स्तुत्या प्रार्थयति, कदाऽपि सुप्तिरहितस्य देवं प्रबोधयति । समस्त जीवानां कल्याणार्थं प्रार्थयति। पुनः पूर्वमिव ईश्वरस्य सृष्टिः प्रारभति ।

एवं ईश्वरस्य अचिंन्त्याद्भुतशक्तेः द्योतनमिव सृष्टिः, स्थितिः , लयानां च चक्रः अनादिकालात् अनन्तकालपर्यन्तं भ्रमत्येव इति ।

" श्रीकृष्णार्पणमस्तु "